धर्मयायतीश धर्मावनं कुरु समग्रकृतावतारो गच्छामि चाद्य हिमवंतमगं प्र

तीतः ३७ एवं समुच्य निरगाद् यथ श्रीशंकराचार्यो यात्रां समाप्य निखिलान्नि

दिदेश राज्ञः देवालयानि निखिलानि नवानि कृत्वा तत्स्थमनाय च प्रभुवं

सज्जयाद्विजेभ्यः ३८ आज्ञप्तास्तेन ते भूपा यथाप्रोक्तं समाचरन् महर्षि

रुद्राणि रुद्राद्यैर्महाबलमतोषयन् ३९ अशोकाख्ये वने कृत्वा मठं गुर्वा

ज्ञया नृपाः यथाविधि कृतं सर्वं शंकरायन्यवेदयन् ४० विद्यानंदं स्वप्र

शिष्यं पुरस्कृत्य प्राचीवाचं तिष्ठ चास्मिन्मठे त्वं धर्मोपेतांश्छिष्यान्स्थापयित्वा यथार्हं

षण्मूर्त्यर्चासक्तचेताः सुखेन ४१ श्रीशंकराचार्यनिदेशतोऽसौ तिष्ठन्

मठे शोकवने सभिक्षुः शशास धर्मेण समस्तवर्णांस्त्रिदशमूर्त्यर्चनसक्तचेताः ४२